

विपाकश्रुतोपनिषद्

सिज्झिहिति बुज्झिहिति
सव्वदुक्खाणमंतं करिहिति

पञ्चमगणधर-भगवल्लब्धिनिधान-
श्रीसुधर्मस्वामिप्रणीतविपाकश्रुताङ्गसूत्रस्य
सारसञ्चयरूपा

# विपाकश्रुतोपनिषद्

• सञ्चयनम् - सम्पादनम् •
प्राचीनश्रुतोद्धारक
प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः
प.पू.आ.श्रीकल्याणबोधिसूरीश्वराः

प्रकाशकः
श्री जिनशासन आराधना ट्रस्ट

મૂળ કૃતિ : **વિપાકશ્રુતાઙ્ગસૂત્ર**

મૂળ કૃતિકાર : **સર્વલબ્ધિનિધાન પંચમગણધર શ્રીસુધર્માસ્વામિ ભગવાન**

નવનિર્મિત સારસંચય : **વિપાકશ્રુતોપનિષદ્**

નવસર્જન+સંપાદન : પ્રાચીનશ્રુતોદ્ધારક પ.પૂ.આ.શ્રી **હેમચંદ્રસૂરીશ્વરજી** મહારાજાના શિષ્ય પ.પૂ.આ.શ્રી **કલ્યાણબોધિસૂરીશ્વરજી** મહારાજા

વિષય : **દુઃખવિપાક અને સુખવિપાક**

વિ. સં. ૨૦૬૮ • વી. સં. ૨૫૩૮ • સને ૨૦૧૨

પ્રથમ આવૃત્તિ, પ્રતિ : ૫૦૦

*No Copyright. • Reproduction Welcome.*

## પ્રાપ્તિસ્થાન

### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ

18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com

---


પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी




અનરાધાર અનુગ્રહ



अनन्तलब्धिनिधानः श्रीगौतमस्वामी

# पञ्चमगणधरः श्रीसुधर्मास्वामी



## કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

## • પ્રકાશકીય •

કુશળ અધ્યાપકોની અધ્યાપનશૈલી એવી હોય છે, કે તેઓ પહેલા આખો પદાર્થ સમજાવી દે, પછી કહે, 'હવે ચોપડી ખોલો, ને વાંચો.' વાંચતા જઈએ ને જાણે વાર્તા હોય, એમ સમજાતું જાય. દુર્ગમ ગ્રંથ પણ સુગમ બની જાય.

આ જ શૈલી આગમ-અધ્યયનમાં પણ ઉપયોગી બને, એ માટે કુશળ અધ્યાપકની ગરજ સારે તેવી આ આગમ ઉપનિષદ્ની શ્રેણિ પ્રકાશિત કરતા રોમહર્ષ અનુભવીએ છીએ. અધિકારી સંયમી ભગવંતોનો આગમ-અભ્યાસ આ શ્રેણિ દ્વારા સુગમ બને... અને અભ્યાસ બાદ પણ આ વિહારોપયોગી પ્રકાશનના આલંબને દીર્ઘ કાળ સુધી આગમિક પદાર્થોના પરાવર્તન થતા રહે... આ ઉપહાર આપણને બહુશ્રુતોનો ઉપહાર આપે.. એવી સહજ સંવેદના થાય છે. વંદન... પરમ કૃપાળુ પરમાત્માને. વંદન... પૂજનીય શ્રીગણધર ભગવંતો આદિ પૂર્વાચાર્યોને. વંદન... આગમ અધ્યયનનું આ આલંબન આપનાર પૂજ્યશ્રીને.

લિ.

શ્રી જિનશાસન આરાધના ટ્રસ્ટ

ટ્રસ્ટીઓ

શ્રી ચંદ્રકુમાર જરીવાલા શ્રી પુંડરીકભાઈ શાહ

શ્રી લલિતભાઈ કોઠારી શ્રી વિનયચંદ્ર કોઠારી

णमोत्थु णं समणस्स भगवओ महावीरस्स

श्री प्रेम-भुवनभानु-पद्म-जयघोष-हेमचन्द्रसूरिभ्यो नमः

## Turning Point

તો
પાક પાછળ
પાગલ
દુનિયાની દોટની
દિશા બદલાઈ જાય.

જો
એની દૃષ્ટિમાં
ગોઠવાઈ જાય
વિપાક.

પછી
દૂર નથી મોક્ષ
કારણ
દોટમાં તો
સહુ દક્ષ જ છે.

- આ. કલ્યાણબોધિસૂરિ

जराजर्जरिता नारी
तरुणी वाऽपि रूपिणी।
द्वयं समं यदा भाति
तदाऽपेक्षा कथं भवेत्?॥

- તત્ત્વપ્રેમ (યોગબિન્દુ - શ્લોકવાર્તિક)

अथ

# विपाकश्रुतोपनिषद्

श्रीवर्द्धमानं जिनवर्द्धमानं
सूरीन्द्रमेव गुरुहेमचन्द्रम् ।
प्रणम्यं नम्यं रमणीयरम्यं
ब्रुवे विपाकश्रुतसत्कगुह्यम् ॥

द्वावत्र श्रुतस्कन्धाः। (१) दुःख-विपाकाः (२) सुखविपाकाः

## (१) दशाध्ययनान्यत्र। (१-१)

**मृगापुत्रः** - मृगग्रामनगरम्, विजय-नामा क्षत्रियराजा, मृगावती देवी, तत्पुत्रो जात्यन्धो जातिबधिरः, सर्वावयवप्रमाण-विकलः, वातिकश्च। नास्य हस्ताद्यवयवाः, अपि त्वाकृतिमात्रं तदङ्गोपाङ्गानाम्। प्रतिजागर्यतेऽसौ मात्रा रहसि भूमिगृहे।

**समवसरणे जात्यन्धं दृष्ट्वा गौतम-स्वामिप्रश्ने भगवतो मृगापुत्रस्वरूप-प्रकाशनम्,** भगवदनुज्ञया तद्दर्शनाय स्वामिगमनम्, विपुलाशनादि गृहीत्वा मृगादेव्या भूमिगृहे गमनम्, चतुष्पुटवस्त्रेण

मुखबन्धनम्, तदुक्त्या स्वामिनोऽपि मुख-वस्त्रिकोपयुञ्जनम्, पराङ्मुखीभूय तया द्वारोद्घाटनम्, अहि-गो-श्वमृतकादप्य-निष्टतरगन्धनिःसरणम्, अशनादौ मृगापुत्र-मूर्च्छा, आहारः, क्षिप्रमेव विध्वंसयित्वा पूयशोणिततया परिणामः, तस्याप्याहारः।

अहो प्राकृतदुष्कृतफलमेतत्, न दृष्टा मया नरकाः, प्रत्यक्षमेष नरकप्रतिरूपकं वेदयति तु वेदनाम्-इति स्वाम्यध्यवसायः, भगवदग्रे **तत्पूर्वभवप्रश्नः, भगवदुत्तरम् -**

जम्बूद्वीप - भरते शतद्वारनगरस्या-

ग्निदिशि विजयवर्द्धमानखेटः, तस्य पञ्च-
शतग्रामाणामधिपः **इक्काइं राष्ट्रकूटः**, स
चाधार्मिकः, बहुकरभरवृद्धिलञ्चादिभि-
पञ्चग्रामशतानि स्वाचारभ्रष्टानि कुर्वतस्त-
र्जयतस्ताडयतो निर्धनानि कुर्वतश्च तद्वि-
हरणम्, तत्तत्कार्येषु मृषाभाषणम्, एवं
बहुसङ्क्लिष्टपापार्जनम्।

अन्यदाऽस्य **१६ रोगोदयः** - (१) श्वासः (२) कासः (३) ज्वरः (४) दाहः (५) कुक्षिशूलः (६) भगन्दरः (७) अर्शः (८) अजीर्णम् (९) दृष्टिः (१०) मूर्धशूलः

(११ अरोचकः (१२) अक्षिवेदना (१३) कर्णवेदना (१४) कण्डूः (१५) जलोदरः (१६) कुष्ठः।

यो वैद्यादिरेकमप्युपशमयति रोगम्, तस्य विपुलार्थसम्पद्दानघोषणाकारापणम्, बहुवैद्यकृताभ्यङ्गनविरेचनानामपि निष्फलत्वम्, वैद्यपरिचारकत्यक्तस्यौषधादिनिर्विण्णस्य राष्ट्रादिमूर्च्छितस्यार्त्तध्यानमुपगतस्यास्य २५० वर्षायुः परिपाल्य **रत्नप्रभायां सागरस्थितिकनारकत्वेनोत्पादः** ततश्च्युत्वा मृगादेवीकुक्षावुत्पत्तिः,

मृगादेव्यास्तीव्रवेदनाप्रादुर्भावः, पतेरनिष्ट-त्वगमनम्, गर्भपातयत्नवैफल्यम्, दुःख-पूर्वमकामेन गर्भवहनम्।

गर्भगतस्यैव तस्याष्टनाड्य आभ्यन्त-रप्रवहाः, तावत्यो बहिःप्रवहाः, तावत्यः पूयप्रवहाः, तावत्यः शोणितप्रवहाः, कर्णान्तरयोरक्ष्यन्तरयोर्नासान्तरयोर्धमन्यन्तरयोश्च द्वे द्वेऽभीक्ष्णं पूयं शोणितं च परिस्रवन्त्य-स्तिष्ठन्ति। गर्भगतस्यैव तस्याग्निकवायु-प्रादुर्भावः, आहृतस्य क्षिप्रमेव विध्वंसः, पूयशोणिततया परिणामः, तस्याप्याहारः।

जातमात्रस्य दर्शने भीताया मृगादेव्या

कचवरे तत्त्यागनिर्देशः, प्रथमत्यागेऽपरेषा-
मस्थैर्यं मा भूदिति पत्युक्त्या भूमिगृहे
तत्प्रतिजागरणम्। **तद्भाविकथनम्** - २६
वर्षाणि स्वायुः प्रतिपाल्य जम्बूद्वीप-भरत-
वैताढ्यमूले **सिंह**तयोत्पत्तिः, बहुपापमु-
पार्ज्य रत्नप्रभायां सागरस्थितिक**नारक**-
तयोत्पादः, ततः **सरीसृपे**षूत्पद्य द्वितीय-
पृथ्व्यां सागरत्रयायु**र्नारक**तयोत्पादः, ततः
**पक्षी**षूत्पद्य **तृतीयपृ०** सा, ततः **सिंहः**,
ततस्**तुर्यपृ०**, ततः **सर्पः**, ततः **पञ्चमपृ०**,
ततः **स्त्री**, ततः **षष्ठपृ०**, ततः **मनुष्यः**,
ततः **सप्तमपृ०**, ततो **जलचराणां**

**जातिकुलकोटियोनिप्रमुखलक्षेषु प्रत्येकेऽनन्तलक्षकृत्व** उत्पादः, एवं चतुष्पदादौ पृथ्वीकायिक-पर्यन्ते सर्वत्र।

ततः सुप्रतिष्ठितनगरे **गोभूतस्या**-कालमरणेन तत्रैव **श्रेष्ठिपुत्रत**योत्पत्तिः, स्थविरान्तिके **प्रव्रज्या**, यावत् समाधिना कालं कृत्वा **सौधर्म** उत्पादः, ततोऽपि दृढप्रतिज्ञवद् **विदेहे सिद्धिः**।

(१-२) वणिग्ग्रामनगरे भिक्षार्थं गतस्य गौतमस्वामिनो विजयमित्रसार्थवाह-सुभद्राभार्यापुत्र-**उज्झितककुमार**-

विडम्बनादर्शनम्, तद्यथा - अवकुटक-बन्धनम्, कर्णनासोत्पाटनम्, वध्यवस्त्र-परिधानम्, रक्तपुष्पमालाधारणम्, तिल-शश्छिद्यमानता, स्वमांसशकलखाद्य-मानता, चर्ममयाश्वोत्त्रासोपकरणशतै-स्ताड्यमानता च।

उद्घोषणा च तदा, यथा नास्योज्झितककुमारस्य राजादिः कश्चिदपराध्यति, अपि त्वात्मनः कर्माणि - इति। प्राग्वत् स्वाम्यध्यवसायः पृच्छा च। भगवदुत्तरम् -

जम्बूद्वीप-भरत-हस्तिनापुरे **भीम-**

**कूटग्राह**- उत्पलाभार्या, गर्भवत्यास्तस्या मासत्रयसमाप्तौ वृषभादिसत्ककुदाद्या- हाराभिलाषः, तदपूर्त्तौ शरीरशोषः, ज्ञात- व्यतिकरस्य पतेरर्द्धरात्रौ गोमण्डपे गमनम्, बहुगवादीनां तत्तदङ्गछेदपुरस्सरमानयनम्, दोहृदसम्पूर्त्तिश्च।

जातमात्रस्य तत्पुत्रस्य महच्छब्दाऽऽ- रसितेन बहुगवादीनां भयेन समन्तात्प- लायनम्, गोत्रासनामस्थापनम्, पितृमरणा- नन्तरं राज्ञा कूटग्राहत्वेन तत्स्थापनम्, अत्यन्तमधार्मिकताऽस्य, गोमण्डपे प्रत्य-

र्द्धरात्रं गत्वा बहुगवादीनां तत्तदङ्गच्छेदः, तदाहारः, ५०० वर्षायुः प्रतिपाल्य द्वितीय-पृथ्व्यां सागरत्रयायुर्नारकतयोत्पादः।

ततः सुभद्राकुक्षावुत्पादः, मा भूत् पूर्वपुत्राणामिवास्य मरणमिति जातमात्रस्य कचवरोत्करे परिहारः, पुनः ग्रहणम्, उज्झितककुमारनामस्थापनम्, मातापितृ-मरणानन्तरं स्वगृहान्नगररक्षकैस्तन्निष्का-शनम्, कामध्वजगणिकया सह विलासः।

विजयमित्रराज्ञः श्रीदेव्या योनिशूलो-त्पत्तिः, भोगासामर्थ्यम्, उज्झितकं निष्का-शयित्वा राज्ञो गणिकाभोगः, तदेकाध्य-

वसितस्योज्झितकस्य छिद्रमार्गणम्, तद्गृहप्रवेशः, तद्भोगप्रवृत्त्यां सत्यां राजाऽऽगमनम्, प्रागुक्तरीत्या तद्वधाज्ञा च।

**तद्भावि**- अद्यैव त्रिभागावशेषे दिने शूलीभिन्नस्य रत्नप्रभा**नारक**तयोत्पादः, ततो **वानर**भूतस्य वानरडिम्भानां वध-करणम्, ततो गणिकाकुले जातमात्रस्य वर्द्धितककरणं नपुंसककर्मशिक्षा च, **प्रियसेन**नामस्थापना, विद्या-मन्त्र-चूर्णादि-प्रयोगैर्बहु पापं समर्ज्य २१०० वर्षायुः परिपाल्य रत्नप्रभा**नारक**तयोत्पादः, ततः **सरीसृप** इत्यादि सर्वं **मृगापुत्रवत्**।

॥ १२ ॥

अन्ते चम्पायां **महिषभूतस्य** कृत-वधस्य तत्रैव **श्रेष्ठिकुल** उत्पत्तिः, **प्रव्रज्या**, **सौधर्म** उत्पादः, **विदेहे सिद्धिश्च**।

**(१-३)** पुरिमतालनगरसमीपे चौर-पल्ल्यां विजयश्चौरसेनापतिः, अत्यन्तमधर्मी दृढप्रहारः पञ्चचौरशतपतिः, बहुनगर-घातादिप्रवृत्तिः, तत्पुत्रो**ऽभग्नसेनः**, भिक्षार्थं गतस्य गौतमस्वामिनस्तद्विडम्बनादर्शनम्, तद्यथा- उज्झितकवद् बन्धनादि, प्रथम-चत्वरे तदग्रे तदष्टपितृलघुभ्रातृघातः, ताडनपुरस्सरं तन्मांसशोणिताभ्यवहार-कारणं च, द्वितीये तदग्रे तदष्टपितृलघु-

भ्रातृजायाघातस्तन्मांसादिद्यभ्यवहारकारणं च। एवं क्रमेण महापितृ-महामातृ-पुत्र-स्नुषा-जामातृ-दुहितृ-नप्तृक, नप्तृका-नप्तृकापति-नप्तृभार्या-पितृस्वसृपतिपितृ-स्वसृ-मातृस्वसृपति-मातस्वसृ-मातुल-भार्या-शेषमित्रादिघातस्तन्मांसाद्याहार-कारणं च। प्राग्वत्स्वामिचिन्ता पृच्छा च, भगवदुत्तरम् -

पुरिमतालेऽ**ण्डवणिग्** **निम्नकः**, अत्यन्तमधार्मिकता, बहुजलचरस्थलचर-खेचराण्डानां तवकादौ भर्जनादिकारापणं विक्रयकारापणं च, स्वयमपि तदाहारकरणं

च, बहु पापं समर्ज्य १००० वर्षायुः परिपाल्य **तृतीयपृ०** सप्तसागरायुर्नारकयोत्पादः।

ततो विजयपुत्रत्वेन गर्भगते तस्मिन् मातुः पुरुषनेपथ्यविहारदोहदस्तत्पूर्त्तिश्च, अभग्नसेननामस्थापना, अष्टकन्यापरिणयः, सुखानुभूतिः, पितृमरणानन्तरं सेनापतित्वम्, नगरघातादिकरणम्, जानपदलोकाभ्यर्थितराज्ञा बलेनाभग्नसेनं गृहीतुमशक्तेन छलेन तद्ग्रहणम्, उक्तरीत्या वधोद्घोषकरणं च।

**तद्भावि** - ३७ वर्षाण्यायुः पालयित्वा रत्नप्रभायां सागरस्थितिक**नारक**तयोत्पादः, ततः संसारो, **मृगापुत्रवत्**। ततो वाणारस्यां **शूकर**भूतस्य कृतवधस्य तत्रैव **श्रेष्ठिपुत्र**-तयोत्पत्तिः, **शेषमुक्तवत्**।

**(१-४)** साहञ्जनी नगरी, महाचन्द्रो राजा, सुषेणोऽमात्यः, सुदर्शनागणिका, सुभद्रसार्थसार्थवाह-भद्राभार्यापुत्रः **शकटः**, शकटगणिकयोर्विडम्बना उज्झितकवत्, गौतमस्वामिपृच्छायां भगवदुत्तरम्-

जम्बूद्वीप-भरत-छगलपुरे **छणिक**-

नामा छागलिकः, तद्वाटके सहस्रसङ्ख्या अजप्रभृतिपशवः, तद्वधमांसरन्धनविक्रय-कारापणम्, स्वयं तदाहारश्च, ७०० वर्षायुः पालयित्वा तुर्यपृथ्व्यां दशसागरायु**र्नारक**-त्वेनोत्पादः, ततः सुभद्रपुत्रत्वेन जात-मात्रस्य शकटस्याधस्तात् स्थापनम्, अतः शकटनामकरणम्, मातापितृमरणानन्तरं स्वगृहान्निष्काशितस्य सुदर्शनागणिका-सम्प्रलग्नता।

कदाचिदमात्यकृततद्गणिकाग्रहः, तद्गृद्धस्य शकटस्यान्तरं मार्गयित्वा

तद्भोगः, तदाऽऽगतस्यामात्यस्य कोपः, दण्डकरणाय राज्ञाऽनुज्ञातस्योक्तविधयो-भयोर्वधादेशश्च।

**तद्भावि** - ५७ वर्षायुः प्रतिपाल्याद्य त्रिभागावशेषे दिने तप्तसमज्योतिर्भूतायो-मयस्त्रीप्रतिमाऽऽलिङ्गनं कारापितस्य मृत्वा रत्नप्रभा**नारक**तयोत्पादः।

ततोऽपि तस्य सुदर्शनायाश्च मातङ्ग-कुले **युगल**तयोत्पादः, प्राप्तयौवनस्य सुदर्शनाभोगः, कूटग्राहकत्वप्रतिपत्तिः मृत्वा रत्नप्रभा**नारक**तयोत्पादः, ततोऽपि

**मृगापुत्रवत् संसारः**, अन्ते **मत्सभूतस्य** कृतवधस्य वाणारस्यां **श्रेष्ठिपुत्र**तयोत्पत्तिः, प्रव्रज्या, **सौधर्म** उत्पत्तिः, ततोऽपि **विदेहे सिद्धिः**।

**(१-५)** कौशाम्बीनगरी, सोमदत्त-पुरोहितपुत्र**बृहस्पतिदत्त**विडम्बनादर्शनम्, पृच्छा, भगवदुत्तरम्-

जम्बूद्वीप - भरते सर्वतोभद्रनगरम्, महेश्वरदत्तपुरोहितस्य जितशत्रुराज्ञो राज्य-बलवृद्ध्यर्थं प्रतिदिनं एकब्राह्मणपुत्र-एकक्षत्रियपुत्र-एकवैश्यपुत्राणां हृदयमांस-

पिण्डेन शान्तिहोमकरणम्, अष्मीचतुर्दशीषु तत्तत्पुत्रद्वयम्, चातुर्मास्यां चतुष्कम्, मासषट्केऽष्टकम्, संवत्सरे षोडशकम्, परबलाभियोगे चाष्टशतम्, ततः परबल-विध्वंसप्रतिषेधान्यतरभवनम्। ३००० वर्षायुः प्रतिपाल्य पञ्चमपृथ्व्यां १७ सागरायु**र्नार**कतयोत्पादः।

ततोऽप्यत्र **पुरोहित**त्वेनाऽनुज्ञातान्तः पुरप्रवेशस्योदायनराज्ञः पद्मावतीदेवीसम्प्र-लग्नता, ज्ञातव्यतिकरराज्ञ उक्तरीत्या वधादेशश्च।

**तद्भावि** - ६४ वर्षाण्यायुः प्रति-पाल्याद्य त्रिभागशेषे दिने शूलीभिन्नस्य रत्नप्रभा**नारक**तयोत्पाद इत्यादि **मृगापुत्र-वत्**, अन्ते हस्तिनापुरे **मृग**भूतस्य कृतवधस्य तत्रैव **श्रेष्ठिपुत्र** इत्यादि यावत् **सिद्धिः**।

**(१-६)** मथुरायां राजपुत्र**नन्दिषेण**स्य विडम्बनादर्शनम्, तद्यथा - तप्तायोमयसम-ज्योतिर्भूतसिंहासने निवेशनम्, तप्तायः - त्रपुः-ताम्र-सीसक-चूर्णादिजल-क्षारतैल-भृतैः कलशैरभिषेककरणम्, तप्तायोमय-हारादिपरिधापनं च। पृच्छा, भगवदुत्तरम्-

जम्बूद्वीप - भरत-सिंहपुरे सिंहरथराज्ञो **दुर्योधन**नामा चारकपालकोऽधार्मिकः, चौरादीनां तप्तायः-ताम्र-त्रपुः-सीसकादि-पानकारापणम्, निर्दयं बन्धगोचरीकरणम्, हस्तादिछेदनम्, वेणुलतादिभिर्हननम्, उरसि शिला-प्रयोगेणास्थिभञ्जनम्, अधःशिरसः कूपजले बोलणाकर्षणम्, क्षारतैलाभ्यङ्गनम्, ललाटादौ लोहकील-कादिदानम्, अङ्गुल्यादौ सूचीप्रवेशनम्, ततोऽपि तादृशहस्तैर्भूमिकण्डूयनकारा-पणम्, प्रहरणैः शरीरं प्रच्छादयित्वा दर्भादिभिर्वेष्टयित्वाऽऽतपे मुक्त्वा शुष्के

सति सहसोत्पाटनं च। ३१०० वर्षाण्यायुः प्रतिपाल्य षष्ठपृथ्व्यां २२ सागरायु**र्नारक**-तयोत्पादः, ततोऽत्र श्रीदामराजपुत्रतयो-त्पादः, नन्दिषेणनामस्थापना, राज्यगृद्धस्य राज्ञोऽलङ्कारिकाय तद्वधोपदेशदानम्, तेन राज्ञः कथनम्, राज्ञ उक्तरीत्या वधादेशश्च।

**तद्भावि** - ६० वर्षाण्यायुः प्रतिपाल्य रत्नप्रभेत्यादि **मृगापुत्रवत्**। अन्ते हस्तिनापुरे **मत्स**भूतस्य कृतवधस्य तत्रैव **श्रेष्ठिपुत्र** इत्यादि यावत् **सिद्धिः**।

(१-७) पाटलषण्डे नगरे सागरदत्त-

सार्थवाहपुत्रोम्बरदत्तविडम्बनादर्शनम्, तद्यथा-कण्डूप्रभृतिरोगाः, हस्तादिगतशोफाः, कर्णनासाङ्गुलिशाटः, पूयरुधिरप्रगलनम्, पूयरुधिरकृमिवमनम्, करुणोत्पादकवि-स्वरशब्दकरणं च। एवं षष्ठपारणकदिनेषु त्रिकृत्वो दृष्ट्वा पृच्छा, भगवदुत्तरम्-

जम्बूद्वीप- भरते विजयपुरे कनकर-थराज्ञो **धन्वन्तरी वैद्यः**, अष्टाङ्गायुर्वेद-पाठकः, दुर्बल-ग्लानव्याधितादीनां मत्स्य-कच्छप-मकर-अजप्रभृतिमांसखादनो-पदेशः, स्वयमपि तदाहारः, ३२००

वर्षाण्यायुः प्रतिपाल्य षष्ठपृथ्व्यां २२ सागरायुर्नारकतयोत्पादः।

ततश्च्युत्वा सागरदत्तसार्थवाह- पुत्र-तयोत्पादः, उम्बरदत्तयक्षोपयाचनप्राप्ततया तन्नामस्थापनम्, मातापितृमरणानन्तरं स्व-गृहान्निष्काशनम्, उक्तरोगाभिभूतत्वं च।

**तद्भावि** - ७२ वर्षाण्यायुः प्रति-पाल्य रत्नप्रभेत्यादि प्राग्वत्। हस्तिनापुरे **कुर्कुट**भूतस्य कृतवधस्य तत्रैव **श्रेष्ठिपुत्र** इत्यादि यावत् **सिद्धिः**।

(१-८) शौर्यपुरे समुद्रदत्तनाम्नो

मत्स्यबन्धस्य पुत्रस्य **शौर्यदत्तस्य** विडम्बनादर्शनम्, तद्यथा- शरीरशोषः, निर्मांसता, मत्स्यकण्टकस्य गललग्नता, विस्वरकूजनम्, पूय-रुधिर-कृमिकवलानामभीक्ष्णवमनं च। पृच्छा, भगवदुत्तरम्-

जम्बूद्वीप - भरते नन्दिपुरे मित्रराज्ञो महानसिकः श्रीयकः, अधार्मिकः, प्रतिदिनं बहुजलचर-स्थलचर-खेचरमांसरन्धनम्, राज्ञ उपनयनम्, स्वयमपि खादनम्, ३३०० वर्षाण्यायुः प्रतिपाल्य षष्ठपृथ्व्यामुत्पादः।

अत्र जातस्य शौर्यदत्तयक्षोपयाचन-प्राप्ततया तन्नाम, पितृमरणानन्तरं स्वयं मत्स्यबन्धमहत्तरत्वप्रतिपत्तिः, प्रतिदिनं यमुनायां गलजालादिभिर्बहुमत्स्यघातकारापणम्, तद्विक्रयकारापणम्, स्वयमपि तत्स्वादनम्, कदाचित् तद्गले मत्स्य-कण्टकलगनेन महद्वेदनाप्रादुर्भावः, वैद्यार्थमुद्घोषणा, वैद्यादिकृतोपायनिष्फलता।

**तद्भावि** - ७० वर्षाण्यायुः प्रतिपाल्य रत्नप्रभेत्यादि प्राग्वत्। ततो हस्तिनापुरे **मत्स**भूतस्य कृतवधस्य तत्रैव **श्रेष्ठिपुत्र** इत्यादि यावत् **सिद्धिः**।

(१-९) रोहितकनगरे दत्तगाथापतिदुहिता **देवदत्ता**, तद्विडम्बनादर्शनम्, तद्यथा-अवकुटकबन्धनम्, कर्णनासोत्क्षेपो यावच्छूलीभेदः। पृच्छा, भगवदुत्तरम्-

जम्बूद्वीप - भरते महसेनराजपुत्रः **सिंहसेनो राजा**, श्यामादेवीमात्राऽऽसक्तिः, अनादृतशेषैकोनापञ्चशतदेवी - तद्धात्रीणां श्यामामारणार्थं छिद्रान्वेषणम्, ज्ञातव्यतिरेण राज्ञा छलेन निर्दयमग्निप्रज्वालनेन तन्मारणम्, ३४०० वर्षाण्यायुः प्रतिपाल्य षष्ठपृथ्व्यां २२ सागरायुर्नारकतयोत्पादः।

ततोऽत्र देवदत्तातयोत्पन्नाया पुष्य-नन्दयुवराज्ञा विवाहः, राजभूतस्य तस्य मातृभक्त्या स्वभोगवञ्चनां मन्यमानया देवदत्तयाऽपाने तप्तलोहदण्डप्रक्षेपेण तन्मातृवधकरणम्, कुपितराज्ञा उक्तरीत्या तद्वधाऽऽज्ञापनं च।

**तद्भावि** - ८० वर्षाणि स्वायुः पालयित्वा रत्नप्रभेत्यादि प्राग्वत्। ततो गङ्गपुरे **हंस**भूतस्य कृतवधस्य तत्रैव **श्रेष्ठिपुत्र** इत्यादि यावत् सिद्धिः।

(१-१०) वर्धमानपुरे धनदेवसा-

र्थवाहसुता **अञ्जू**, तद्विडम्बनादर्शनम्, यथा-शरीरशोषादिः, पृच्छा, भगवदुत्तरम्-

जम्बूद्वीप - भरते इन्द्रपुरे **पृथ्वी-श्रीगणिका**, बहुराजेश्वरादीन् चूर्णप्रयोगा-दिनाऽभियुज्य भोगप्रवृत्तिः, ३५०० वर्षा-ण्यायुः प्रतिपाल्य षष्ठपृथ्व्यां २२ सागरा-**युर्नारक**तयोत्पादः।

ततोऽत्राञ्जूश्रीतयोत्पन्नाया विजयराज्ञा विवाहः, योनिशूलप्रादुर्भावः, वैद्यानां निष्फलता, उक्तवेदना च।

**तद्भावि** - मृत्वा रत्नप्रभेत्यादि

प्राग्वत्। ततः सर्वतोभद्रनगरे **मयूरभूतस्य** कृतवधस्य तत्रैव **श्रेष्ठिपुत्र** इत्यादि यावत् सिद्धिः।

**(२) सुखविपाकेष्वपि दशाध्ययनानि। (२-१)** हस्तिशीर्षनगरेऽदीनशत्रुराज-धारिणीदेवीसुतः सिंहस्वप्नसूचितः **सुबाहुकुमारः**, पञ्चशतप्रासादावतंसकाः, पुष्पचूलिकादिपञ्चशतराजकन्यापरिणयः, पञ्चशतहिरण्यकोटिस्वामित्वम्, श्रीवीरदेशनाश्रुतिः, गृहिधर्मप्रतिपत्तिः।

गौतमस्वामी - अहो भदन्त ! प्रियत्वं

प्रियरूपत्वं बहुजनेष्टत्वं साधुजनकान्तत्वं च सुबाहुकुमारस्य। तत् कथमनेनैतादृशर्द्धि-रवाप्तेति प्राग्भवपृच्छा। भगवदुत्तरम्-

जम्बूद्वीप - भरते हस्तिनापुरे **सुमुख-गाथापतिः**, पञ्चश्रमणशतपरिवृतधर्मघोष-स्थविरोपागमः, नित्यं मासक्षपणं कुर्वतः **सुदत्तानगारस्य** पारणके सुमुखगृह आग-मनम्, तं दृष्ट्वा हृष्टतुष्टस्यासनादभ्युत्थानम्, पादपीठात्प्रत्यवतरणम्, पादुकामोचनम्, एकशाटिकोत्तरासङ्गकरणम्, सप्ताष्टपदान्य-भियानम्, त्रिकृत्वः प्रदक्षिणा, वन्दनम्, नमस्कारः, स्वहस्तेन विपुलेनाशनादिना

प्रतिलाभयिष्यामीति तुष्टः, प्रतिलाभयनपि तुष्टः, प्रतिलाभितेऽपि तुष्टः।

एवं द्रव्य-दायक-प्रतिग्राहकशुद्ध्या त्रिविधेन त्रिकरणशुद्धेन सुदत्तानगारे प्रतिलाभिते सति परीत्तीकृतः संसारः, बद्धं च मनुष्यायुः। तद्गृहे प्रादुर्भूतानि **पञ्चदिव्यानि** - (१) वसुधारा वृष्टा (२) पञ्चवर्णपुष्पानि निपतितानि (३) चेलोत्क्षेपः कृतः (४) आहता देवदुन्दुभयः (५) अन्तराऽप्याकाशेऽहो दानमहोदानमिति घुष्टम्। वदन्ति स्म लोका धन्योऽयमित्यादि।

ततो बहुवर्षशतानि स्वायुः पालयित्वाऽत्र राजपुत्रतयोत्पन्नः। **गौतमस्वामी** - समर्थोऽयं प्रव्रजितुं भवदन्तिके ? **भगवान्** - ओम्।

कदाचिदष्टमभक्तिकस्य कृतपौषधस्य सुबाहुकुमारस्य चिन्ता-धन्यास्ते ग्रामादयः, यत्र विहरति श्रमणभगवन्महावीरः, धन्यास्ते राजादयः, ये भगवदन्तिके प्रव्रजन्ति, गृहिधर्मं वा प्रपद्यन्ते, यदि भगवानत्राऽऽगच्छेत्, तदाऽहं प्रव्रजेयं भगवदन्तिके - इति।

एतज्ज्ञात्वा भगवत आगमनम्, मेघकुमारवत् सुबाहुकुमारप्रव्रज्या, एकादशाङ्गाध्ययनम्, बहुतपश्चर्या, मासिकानशनपूर्वं समाधिना कालं कृत्वा **सौधर्म** उपपातः।

पुनर्मनुष्यभूतस्य बोधिलाभः, प्रव्रज्या, सनत्कुमार उपपातः, पुनर्मनु०, प्रव्रज्या, ब्रह्मलोक०, पुनर्मनु०, महाशुक्र० पुनर्मनु०, आनत०, पुनर्मनु०, आरण०, पुनर्मनु०, सर्वार्थसिद्ध०, ततोऽपि महाविदेहे दृढप्रतिज्ञवत् **सिद्धिः**।

(२→२-१०)

| नगरम् | राजा | देवी | पुत्रः | भार्याः |
|---|---|---|---|---|
| ऋषभपुरम् | धनावहः | सरस्वती | भद्रनन्दी | श्रीदेवीप्रमुखाः ५०० |
| वीरपुरम् | वीरकृष्णमित्रः | श्रीदेवी | सुजातः | बलश्रीप्रमुखाः ५०० |
| विजयपुरम् | वासवदत्तः | कृष्णा | सुवासवः | भद्राप्रमुखाः ५०० |
| सौगन्धिका | महाचन्द्र राजकुमार | अर्हद्दत्ता | जिनदासः | |
| कनकपुरम् | प्रियचन्द्रः | सुभद्रा | वैश्रमणः | श्रीदेवीप्रमुखः ५०० |
| महापुरम् | बलः | सुभद्रा | महाबलः | रक्तवत्याद्याः ५०० |

| प्राग्भवे | | |
| --- | --- | --- |
| नगरम् | नाम | प्रतिलाभितोऽनगारः |
| महाविदेहे पुण्डरीकिणी | विजयः | युगबाहुतीर्थङ्करः |
| इषुकारम् | ऋषभदत्तः | पुष्पदत्तः |
| कौशाम्बी | धनपालराजा | वैश्रमणभद्रः |
| मध्यमिका | मेघरथराजा | सुधर्मः |
| मणिवती | मित्रराजा | सम्भूतिविजयः |
| मणिपुरम् | नागदत्तः | इन्द्रदत्तः |

| नगरम् | राजा | देवी | पुत्रः | भार्याः |
|---|---|---|---|---|
| सुघोषम् | अर्जुनः | तप्तवती | भद्रनन्दी | श्रीदेव्याद्याः ५०० |
| चम्पा | दत्तः | रक्तवती | महाचन्द्रः | श्रीकान्ताद्याः ५०० |
| साकेतम् | मित्रनन्दी | श्रीकान्ता | वरदत्तः | वरसेनाद्याः ५०० |

**सर्वेषामपि शेषं सुबाहुकुमारवद् यावत् सिद्धिः।**

| प्राग्भवे | | |
|---|---|---|
| नगरम् | नाम | प्रतिलाभितोऽनगारः |
| महाघोषम् | धर्मघोषः | धर्मसिंहः |
| तिगिञ्छी | जितशत्रुराजा | धर्मवीर्यः |
| शतद्वारम् | विमलवाहनराजा | धर्मरुचिः |

मिथ्याऽस्तु दुःसञ्चितं मम। शोधयन्तु बहुश्रुताः। सञ्चयोऽयमाचार्यकल्याणबोधेः कर्मारिशून्यनेत्रे (२०६८) वैक्रमेऽब्दे वैशाखासितनवम्यां सम्पन्न इति शम्।

## ◆ નવલા નજરાણા ◆

(૧) **તત્ત્વપ્રેમ** → પ.પૂ.શ્રીહરિભદ્રસૂરિ મહારાજા કૃત **યોગબિંદુ** ગ્રંથ પર નવનિર્મિત સંસ્કૃત શ્લોકવાર્તિક.

(૨) **અધ્યાત્મદર્શના** → **મહોપનિષદ્** નામના પ્રાચીન હિંદુ ગ્રંથની નવનિર્મિત સંસ્કૃત ટીકા.

(૩) **સુધોપનિષદ્** → મહો. શ્રીયશોવિજયજી કૃત **વૈરાગ્યકલ્પલતા**-અંતર્ગત '**સમાધિસુધા**' પર નવનિર્મિત સંસ્કૃત ટીકા.

(૪) **શ્રુતમહાપૂજનમ્** → દ્વાદશાંગી સહિત ૮૪ આગમો તથા ૧૦૮ શાસ્ત્રોનું વિધિસહિત પૂજન.

(૫) **ત્રિપદીશતકમ્** → મહો. શ્રીયશોવિજયજી કૃત **અધ્યાત્મસાર** આદિ ગ્રંથો પર પ્રવચનો.

*Don't Miss it.*




મૂળકાર

**યોગીરાજ શ્રી આનંદઘનજી મહારાજ**

પરિશીલનકાર

**આ. શ્રી કલ્યાણબોધિસૂરિજી**

લાભાર્થી

## શ્રી સીમંધર જિન આરાધક ટ્રસ્ટ

એમરલ્ડ એપાર્ટમેન્ટ,
અંધેરી (પૂર્વ), મુંબઈ.

જ્ઞાનનિધિના સદ્વ્યય બદલ
શ્રીસંઘ તથા ટ્રસ્ટીઓની
ભૂરી ભૂરી અનુમોદના

૧૨૧